# Shri Lakshmihayavadana Prapattih

# શ્રીલક્ષ્મીહયવદન પ્રપત્તિઃ

## Document Information

Text title : lakShmIhayavadanaprapattiH

File name : lakShmIhayavadanaprapattiH.itx

Category : vishhnu, prapatti, vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2022

*sanskritdocuments.org*

# શ્રીલક્ષ્મીહયવદન પ્રપત્તિઃ

વિશુદ્ધવિજ્ઞાનઘનસ્વરૂપં વિજ્ઞાનવિશ્રાણનબદ્ધદીક્ષમ્ ।
દયાનિધિં દેહભૃતાં શરણ્યં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧॥

બ્રહ્માણમાદૌ વ્યદધાદમુષ્મૈ વેદાશ્ચ યઃ સ્મ પ્રહિણોતિ નિત્યાન્ ।
સ્વગોચરજ્ઞાનવિધાયિનં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૨॥

ઉદ્ગીથતારસ્વરપૂર્વમન્તઃપ્રવિશ્ય પાતાલતલાદહાર્ષીત્ ।
આમ્નાયમાકણ્ઠહયો ય એતં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૩॥

પ્રદાય પુત્રાય પુનઃ શ્રુતીર્યો જઘાન દૈત્યૌ નિયતાબ્ધિવાસમ્ ।
હવ્યૈશ્ચ કવ્યૈશ્ચ તમર્ચ્યમાનં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૪॥

યન્નાભિનાલીકદલસ્થનીરવિન્દૂત્થિતૌ તૌ મધુકૈટભાખ્યૌ ।
વેદાપહારાય તમો રજસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૫॥

કામ્યાર્ચ્યતાં પ્રાપ્ય વરં સુરેષુ ગતેષુ યજ્ઞાગ્રહરોઽર્થિતો યઃ ।
અદર્શયત્ કાય હયં વપુસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૬॥

યો જાયમાનં પુરુષં પ્રપશ્યન્ મોક્ષાર્થચિન્તાપરમાતનોતિ ।
વિદ્યાધિદેવં મધુસૂદનં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૭॥

આદિત્યબિમ્બેઽશ્વવપુર્દધત્સન્ અયાતયામાન્ નિગમાનદિક્ષત્ ।
યો યાજ્ઞવલ્ક્યાય દયાનિધિં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૮॥

વિજ્ઞાનદાનપ્રથિતા જગત્યાં વ્યાસાદયો વાગપિ દક્ષિણા સા ।
યદ્વીક્ષણાંશાહિતવૈભવાંસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૯॥

મત્સ્યાદિરૂપાણિ યથા તથૈવ નાનાવિધાચાર્યવપૂંષિ ગૃહ્ણન્ ।
વેદાન્તવિદ્યાઃ પ્રચિનોતિ યસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૦॥

શ્રેષ્ઠઃ કૃતજ્ઞઃ સુલભોઽન્વિતાનાં શાન્તઃ સુબુદ્ધિઃ પ્રથિતો હિ વાજી ।
તદાનનાવિષ્કૃતસદ્ગુણૌઘં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૧॥

હસ્તૈર્દધાનં દરચક્રકોશવ્યાખ્યાનમુદ્રાઃ સિતપદ્મપીઠમ્ ।
વિદ્યાખ્યલક્ષ્મ્યઞ્ચિતવામભાગં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૨॥

ઇતિ શ્રીલક્ષ્મીહયવદનપ્રપત્તિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Lakshmihayavadana Prapattih*
pdf was typeset on November 21, 2022

Please send corrections to *sanskrit@cheerful.com*